दिनाङ्क :- 02.05.2025

प्रात: - 06:55

प्रधानमन्त्री- आन्ध्रप्रदेशः

प्रधानमन्त्री नरेन्द्रमोदी अद्य आन्ध्रप्रदेशस्य अमरावतीक्षेत्रे अष्टपञ्चाशत्सहस्र-कोटि-रूप्यकाणां विभिन्नानां विकासात्मक- परियोजनानाम् उद्घाटनं शिलान्यासं च स्थापयित्वा राष्ट्राय समर्पयिष्यति। समग्रे हि देशे विश्वस्तरीय- आधारभूतावसंरचनां सम्पर्कसौविध्यानि च सुनिश्चितुं स्वप्रतिबद्धतानुरूपम् प्रधानमन्त्री आन्ध्रप्रदेशे सप्त- राष्ट्रियराजमार्ग- परियोजनानाम् एकस्याः रेलपरियोजनायाश्च आधारशिलामपि स्थापयिष्यति। अत्रावधौ अनेकासाम् आधारभूतावसंरचनानाम् आधारशिलां संस्थापयिष्यति यासु विधानसभा- उच्चन्यायालय- सचिवालयाः अन्यानि प्राशासनिकभवनानि द्विपञ्चाशत्- शत- सङ्ख्यकानि परिवारेभ्यः आवासभवनानि च सम्मिलितानि सन्तीति। यासां व्ययम् चत्वारिंशदधिक- द्विशतोत्तरैकादश- कोटिरूप्यकाणां यावदेव अस्ति। अत्रान्तरे असौ आन्ध्रप्रदेशस्य नागायलङ्का- स्थले भूयोऽपि षष्टयधिक- चतुश्शतोत्तरैक- सहस्रकोटि- रूप्यकाणां व्यययुत्म् प्रक्षेपास्त्रपरीक्षणक्षेत्रं सम्मिलितम् वर्तते। श्रीमोदी विशाखापत्तनम्- स्थलेस्य मधुरवाड़ाक्षेत्रे पी.एम्. एकता- मॉल- इत्येतस्यापि आधारशिलां स्थापयिष्यति। यस्य प्रयोजनम् राष्ट्रियैकतायाः संवर्धनं एकः जनपदः एकः उत्पादः इत्येतस्य समर्थनमितिवर्तते।

**प्रधानमन्त्री केरलराज्यम्**

**प्रधानमन्त्री नरेन्द्रमोदी अद्य प्रातः काले केरलराज्यस्य तिरूवनन्तपुरम्- स्थले भारतस्य प्रथमस्य अर्ध- स्वचालित- जलपोतस्थानकस्य विजिनजाम- इण्टरनेशनल- पोर्ट- इत्येतस्य अन्ताराष्ट्रिय- जलपोतस्थानकस्य उद्घाटनं विधास्यति। श्रीमोदी अत्रान्तरे जलपोतस्थानकस्य परिचालन- भवनस्य भ्रमणं कृत्वा नियन्त्रण-प्रणाल्याः निरीक्षणं करिष्यति। एतस्मिन् समारोहे केरलप्रदेशस्य राज्यपालः राजेन्द्र- आर्लेकरः मुख्यमन्त्री पिनाराई- विजयन- इत्यसौ केन्द्रीयजलपोत- जलमार्ग- मन्त्री सर्बानन्द- सोनोवालः राज्यस्य मन्त्रिणः वरिष्ठाधिकारिणश्च उपस्थिताः भवेयुरिति।**

**प्रधानमन्त्री-वेव्स्**

**प्रधानमन्त्री नरेन्द्रमोदी अकथयत् यत् वेव्स् शिखरसम्मेलनं वैश्विकमञ्चे भारतस्य रचनात्मकशक्तिं प्रकाशितवत्। असौ उक्तवान् यत् भारतम् चलच्चित्र-निर्माणस्य, डिजिटल-सामग्र्याः, गेमिंग-फैशन इत्यनयोः, संगीतस्य, सजीवप्रसारणस्य च क्षेत्रे वैश्विककेन्द्रस्य रूपेण उद्भवति। ध्यानास्पदं वर्तते यत् ह्यः मुम्बय्यां जियो-वर्ल्ड-कन्वेंशन-सेंटर इत्यत्र वेव्स् इति प्रथमं वैश्विक-मनोरञ्जन-सम्मेलनं समुद्घाट्य प्रधानमन्त्रिणा मोदिना एतत् सर्वं प्रोदीरितम्।**

**तेन प्रतिपादितं यत् वर्तमानसमये, एनीमेशन इत्यस्य वैश्विकापण-मूल्यं त्रिंशदधिक-चतुश्शतं बिलियन-डॉलर-मिततोऽपि अधिकम् अस्ति, अपि च आगामि-दशके अस्य द्विगुणीभूतस्य अनुमानम् अस्ति।**

**उत्तराखण्डम्**

**उत्तराखण्डराज्ये केदारनाथधाम्मोः वेबफलकम् अद्य प्रातः काले सप्तवादनतः श्रद्धालूभ्यः उद्घाटयते। बाबा- केदारनाथस्य पञ्चमुखी- चल- विग्रह- उत्सव- डोली- इत्यपपि सैन्यबलस्य मधुरध्वनिना सह जयद्घोषैः सह च धाम प्राप्तवती।**

**आईपीएल**

**आई.पी.एल्. इत्येतस्यां विंशतिप्रति विंशति- क्रिकेट- स्पर्धा- मालिकायाम् ह्यः रात्रौ क्रीडिते द्वन्द्वे जयपुरस्य सवाईमानसिंह - क्रीडाङ्गणे मुम्बई- इण्डियनस्य - दलेन राजस्थान- रॉयल्स- दलं शतधावनाङ्कैः नगरस्य नरेन्द्रमोदी- क्रीडाङ्गणे गुजरात- टायट्न्स - दलम् सनराइजर्स - हैदराबाद- दलम् सम्मुखीकरिष्यति। कीडैषा सायं सार्धसप्तवादन्तो क्रीडिष्यति।**

**ऋतुविज्ञानम्**

**अद्य तीव्रवातेन वृष्ट्या सह दिल्ल्याः राष्ट्रिय राजधानी- क्षेत्रस्य च जनाः विश्रान्ताः जाताः। अद्य प्रातःकाले दिल्ल्यां तस्याः च निकटवर्तिषु क्षेत्रेषु तीव्रवायुना सह अत्यधिक वृष्टिः जाता। भारतीय- ऋतु- विभागेन आगामिनं दिनद्वयं यावत् अत्यधिकवृष्टिः विद्युत्ध्वनिः तीव्रवायुः च प्रकल्पितः।**